# SUMMATIVE ASSESSMENT – I, 2016-17
## CLASS – VIII
## SUBJECT – LOWER SANSKRIT

*[Time allowed: 3 hours]* *[Maximum Marks: 90]*

**निर्देशा:**

(i) अस्मिन् प्रश्नपत्रे द्वौ खण्डौ स्तः ।
(ii) प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि ।
(iii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् क्रमे लेखनीयानि ।
(iv) प्रश्नसंख्या प्रश्नपत्रानुसारं लेखनीया ।
(v) खण्डसंख्या अपि लेखनीया।
(vi) प्रश्नपत्रे अष्टादश प्रश्ना: सन्ति ।
(vii) सर्वे प्रश्ना: अनिवार्या: ।

## खण्ड: - क (40)

1. **(क) अधोलिखितानां पदानां वर्णान् पृथक् कृत्वा लिखत -** (½ x 4 = 2)

(i) समाप्त: - स् + अ + म् + आ + ........... + त् + अ:
(ii) स्वस्ति: - स् + ........... + अ + स् + त् + इ:
(iii) कीर्ति: - क् + ई + ........... + त् + इ:
(iv) रात्रौ - र् + आ + ........... + र् + औ

**(ख) अधोलिखितानां पदानां वर्णान् संयोज्य लिखत -** (½ x 4 = 2)

(i) क् + ष् + अ + म् + अ + य् + आ = ...... मया
(ii) स् + व् + ई + क् + आ + र् + अ + म् = ...... कारम्
(iii) स् + अ + द् + ऐ + व् + अ = स...... व
(iv) स् + अ + र् + व् + अ + त् + र् + अ = सर्व ......

2. **अधोलिखितवाक्येषु रेखाङ्कितपदमाधृत्य प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा सन्धिं सन्धिच्छेदं वा कुरुत -** (1 x 4 = 4)

(i) <u>साधु + उक्ति:</u> सर्वदा पालनीया ।
(क) साधुक्ति: (ख) साधूक्ति: (ग) साधोक्ति: (घ) साधौक्ति:

(ii) आकाशे <u>सप्तर्षय:</u> शोभन्ते ।
(क) सप्त + ऋषय: (ख) सप्त + र्षय: (ग) सप्तर् + षय: (घ) सप्ता + र्षय:

(iii) एक: <u>दर्शनार्थी</u> नागरिक: आगच्छत् ।
(क) दर्शन + आर्थी (ख) दर्श + नार्थी (ग) दर्शन + अर्थी (घ) दर्शन् + आर्थी

(iv) छात्रै: <u>प्रश्न + उत्तरी</u> आयोजिता ।
(क) प्रश्नत्तरी (ख) प्रश्नात्तरी (ग) प्रश्नोत्तरी (घ) प्रश्नुत्तरी

3. **प्रदत्तविकल्पेभ्यः उचितशब्दरूपं चित्वा रिक्तस्थानपूर्तिं कुरुत -** (1 x 3 = 3)

(i) ............... जलं मधुरम् ।

(क) नदीम्　(ख) नद्याः　(ग) नदी　(घ) नद्यौ

(ii) ............... कुत्र गच्छसि ?

(क) तव　(ख) त्वया　(ग) त्वं　(घ) तुभ्यं

(iii) शिशुः ............... खादति ।

(क) फलेषु　(ख) फलस्य　(ग) फलाभ्याम्　(घ) फलं

4. **प्रदत्तविकल्पेभ्यः उचितसंख्याशब्दं चित्वा रिक्तस्थानपूर्तिं कुरुत -** (1 x 2 = 2)

(i) ............... बालिके पुस्तकं पठतः ।

(क) द्वौ　(ख) द्वे　(ग) द्वयोः　(घ) द्वाभ्याम्

(ii) ............... बालकाः क्रीड़ाक्षेत्रे क्रीड़न्ति ।

(क) चत्वारि　(ख) चत्वारः　(ग) चतस्त्रः　(घ) चतुर्भिः

5. **प्रदत्तविकल्पेभ्यः उचितधातुरूपं चित्वा रिक्तस्थानपूर्तिं कुरुत -** (1 x 4 = 4)

(i) रात्रौ जनाः गृहे एव ............... ।

(क) तिष्ठति　(ख) तिष्ठन्ति　(ग) तिष्ठथ　(घ) तिष्ठामि

(ii) त्वं चलच्चित्रं ............... ।

(क) पश्यति　(ख) पश्यसि　(ग) पश्यामि　(घ) पश्यन्ति

(iii) मम पिता श्वः नगरं ...............।

(क) गमिष्यति　(ख) गमिष्यसि　(ग) गमिष्यामि　(घ) गमिष्यथः

(iv) भक्तः ईश्वरं ...............।

(क) सेवसे　(ख) सेवन्ते　(ग) सेवते　(घ) सेवे

6. **मञ्जूषायां प्रदत्तैः उचितअव्ययपदैः रिक्तस्थानपूर्तिं कुरुत -** (1 x 4 = 4)

(धिक्, बहिः, तदा, उच्चैः, अलम्)

(क) सा ............... गीतं गायति ।

(ख) यदा प्रातः भवति............... सूर्यः उदेति ।

(ग) मूर्खजनं ............... ।

(घ) शिशुः गृहात् ............... गच्छति।

7. **प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा रिक्तस्थानपूर्तिं कुरुत -** (1 x 4 = 4)

(क) ............... उभयतः वृक्षाः सन्ति ।

(i) मार्गस्य　(ii) मार्गम्　(iii) मार्गे　(iv) मार्गात्

(ख) ............... विना मत्स्यः न जीवति ।

(i) जलेन　(ii) जलस्य　(iii) जले　(iv) जलेषु

(ग) सीता ............... सह अगच्छत् ।

(i) रामस्य (ii) रामं (iii) रामेण (iv) राम:

(घ) ............... परित: प्राचीरम् अस्ति ।

(i) गृहस्य (ii) गृहात् (iii) गृहं (iv) गृहे

8. **भवत: अनुज: देवेन्द्र: सर्वदा चलभाषितयन्त्रेण वार्तालापं करोति । अस्य यन्त्रस्य अति-प्रयोग: हानिकर: इति सूचयित्वा तं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तशब्दै: पूरयत -** (½ x10 = 5)

महात्मागान्धी-मार्ग:

नवदिल्ली

तिथि: ...............

प्रिय अनुज (i) ............... !


(ii) ............... । पिता-लिखितं (iii) ............. अद्य एव मया प्राप्तम् । पत्रेण ज्ञातम् यत् (iv) ............... सर्वदा एव चलभाषितयन्त्रेण (v) ...................... करोसि । एतत् तु न (vi) ............... । अनेन तु समयस्य (vii) ............... भवति । पठनस्य काल: अपि (viii) ............... । अत: अस्य अति-प्रयोग: (ix) ............... एव । त्वं पुन: एतत् न करिष्यसि इति मम आशा ।

तव भ्राता

(x) ...............

मञ्जूषा - (शुभाशिष:, वार्तालापं, त्वं, हानि:, हानिकारक:, विनश्यति, देवेन्द्र, महेन्द्र:, उचितम्, पत्रम्)

9. **अधोदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दसहायतया पञ्चवाक्यानि लिखत -** (1 x 5 = 5)



मञ्जूषा -(जना:, नदी, सूर्य:, स्नानं कुर्वन्ति, रमणीयं, देवालया:, वहति, उदेति, स्थानम्, नमस्कारं कुर्वन्ति)

10. **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -** (5)

अहं नदी अस्मि । अहम् अस्याः वसुन्धरायाः सौन्दर्यम् अस्मि । मम साम्राज्यं सम्पूर्णे विश्वे अस्ति । अहं म इव सम्पूर्णं विश्वं पालयामि । पर्वतानाम् उच्चेभ्यः स्थलेभ्यः निःसृत्य अहं सागरं प्रविशामि । अहं स गतिशीला अस्मि । गतिः एव मम स्वभावः मम सन्देशः च । मम जलं पीत्वा एव सर्वे जीवन्ति । मम वि जलम् एव प्राणिनां जीवनम् । अतः जलं प्रदूषितं न करणीयम् ।

**(I) एकपदेन उत्तरत -** (½ x 2 = 1)

(क) नदी कस्याः सौन्दर्यम् अस्ति ?

(ख) नद्याः विशुद्धं जलं केषां जीवनम्?

**(II) पूर्णवाक्येन उत्तरत -** (1 x 2 = 2)

(क) नद्याः साम्राज्यं कुत्र अस्ति ?

(ख) नदी कुतः निःसृत्य सागरं प्रविशति ?

**(III) निर्देशानुसारम् उत्तरत -** (1 x 2 = 2)

(क) 'विश्वं' इति पदस्य किं विशेषणं प्रदत्तम् ?

(i) माता (ii) अहं (iii) सम्पूर्णं (iv) इव

(ख) 'जीवन्ति' इति क्रियापदस्य कः कर्त्ता ?

(i) जलं (ii) सर्वे (iii) एव (iv) पीत्वा

## खण्डः - ख (50)

11. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -** (5)

महात्मा विठोवा एकस्मात् नगरात् बहिः कुटीरं निर्माय वसति स्म । अनेके भक्ताः तस्य दर्शनाय आगत्य तं स्वगृह आगन्तुम् आमन्त्रयन्ति स्म । एकदा एकः दर्शनार्थी नागरिकः रात्रिभोजाय तं महात्मानं प्रार्थयत् । महात्मा विठोव तस्य निवेदनं स्वीकृतवान् । सः यदा भोजनाय तस्य जनस्य गृहम् अगच्छत्, सः कपाटम् आवृत्य कुत्रचित् गत आसीत् । महात्मा विठोवा भोजनं विना एव कुटीरं प्रत्यागच्छत् । रात्रौ च बुभुक्षितः एव अतिष्ठत् ।

**(I) एकपदेन उत्तरत -** (½ x 2 = 1)

(क) कः महात्मानं रात्रिभोजाय प्रार्थयत् ?

(ख) महात्मा नागरिकस्य किं स्वीकृतवान् ?

**(II) पूर्णवाक्येन उत्तरत -** (1 x 2 = 2)

(क) महात्मा विठोवा कुत्र वसति स्म ?

(ख) महात्मा यदा जनस्य गृहम् अगच्छत् तदा किम् अकरोत् सः ?

**(III) निर्देशानुसारम् उत्तरत -** (1 x 2 = 2)

(क) 'दिने' इति पदस्य किं विपरीतपदं गद्यांशे प्रदत्तम् ?

(i) बहिः (ii) रात्रौ (iii) एव (iv) विना

(ख) 'आसीत्' इति क्रियापदस्य कः कर्त्ता ?

(i) सः (ii) कपाटम् (iii) गतः (iv) कुत्रचित्

12. **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -** **(5)**

सुमेधा : संस्कृतभाषाया: कति रूपाणि सन्ति ?

प्रबुद्धः : संस्कृतभाषाया: द्वे रूपे स्त: । एकं वैदिकं संस्कृतं द्वितीयं च लौकिकं संस्कृतम् ।

प्रणवः : वैदिकसंस्कृतस्य किं प्रमुखं साहित्यम् अस्ति ?

निष्ठा : चत्वार: वेदा:, ब्राह्मणग्रन्था:, आरण्यक–ग्रन्था: उपनिषद: च वैदिकं साहित्यं कथ्यते ।

सुमेधा : लौकिकसंस्कृतस्य आरम्भ: कदा अभवत् ?

विवेक: : वाल्मीके: कालात् लौकिकसंस्कृतस्य प्रारम्भ: मन्यते । अस्य कृति: 'रामायणं' लौकिकसंस्कृतस्य आदिम: ग्रन्थ: अस्ति ।

**(I) एकपदेन उत्तरत -** **(½ x 2 = 1)**

(क) संस्कृतभाषाया: कतिरूपाणि सन्ति ?

(ख) लौकिकसंस्कृतस्य आदिम: ग्रन्थ: क: ?

**(II) पूर्णवाक्येन उत्तरत -** **(1 x 2 = 2)**

(क) वैदिकसंस्कृतस्य प्रमुखं साहित्यं किं किम् अस्ति ?

(ख) लौकिकसंस्कृतस्य आरम्भ: कदा अभवत् ?

**(III) निर्देशानुसारम् उत्तरत -** **(1 x 2 = 2)**

(क) 'प्रथम:' इति पदस्य क: पर्याय: अत्र प्रदत्त: ?

(i) कृति: (ii) ग्रन्थ: (iii) आदिम: (iv) अस्य

(ख) 'ग्रन्थ:' इति पदस्य किं विशेषणं प्रदत्तम् ?

(i) रामायणं (ii) अस्ति (iii) आदिम: (iv) संस्कृतस्य

13. **अधोलिखितश्लोकयो: अन्वयं समुचितक्रमेण पूरयत -** **(1 x 8 = 8)**

(I) गर्जति शरदि न वर्षति वर्षासु नि:स्वनो मेघ: ।
नीचो वदति न कुरुते न वदति सुजन: करोत्येव ।।

अन्वय: - मेघ: (i).............. गर्जति वर्षति न । वर्षासु (ii).............. (वर्षति) । नीच: (iii) .............. एव कुरुते न, (iv).............. करोति वदति न ।

(II) वयं पठाम संस्कृतं वयं लिखाम संस्कृतम् ।
सदा वदाम संस्कृतं, प्रचारयाम संस्कृतम् ।।

अन्वय: :- वयं (i).............. पठाम (ii).............. संस्कृतं लिखाम (iii).............. संस्कृतं वदाम, संस्कृतम् (iv).............. ।

14. **अधोलिखितवाक्येषु रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत :-** **(1 x 6 = 6)**

(क) पुरुष: <u>चरणयो:</u> अपतत् ।

(ख) <u>अनुशासनहीन:</u> दण्डनीय: भवति ।

(ग) <u>चटकाया:</u> गृहं नष्टम् अभवत् ।

(घ) चटका काकः च <u>स्वनिवासम्</u> अगच्छताम् ।

(ङ) <u>छात्राः</u> संस्कृतदिवसस्य आयोजनं कृतवन्तः ।

(च) भवभूतिः <u>उत्तररामचरितम्</u> अरचयत् ।

**15. अधोदत्तप्रश्नानाम् उत्तराणि एकपदेन लिखत (पञ्चानाम्)-** (1 x 5 = 5)

(क) सत्सङ्गतिः बुद्धेः किं हरति ?

(ख) वैरेण कानि न शाम्यन्ति ?

(ग) केन कार्यं न सिध्यति ?

(घ) काकः कीदृशः आसीत् ?

(ङ) चटका काकं किं त्यक्तुं कथयति ?

(च) अपराधः केन कृतः ?

**16. अधोदत्तप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत (पञ्चानाम्)-** (2 x 5 = 10)

(क) महात्मनः सहनशीलतां दृष्ट्वा नागरिकः किम् अकरोत् ?

(ख) चटका सर्वम् अवगम्य काकं किम् अवदत् ?

(ग) वृक्षे सुन्दरं गृहं दृष्ट्वा ते मित्रे किम् अचिन्तयताम् ?

(घ) अस्माकं संस्कृतेः सभ्यतायाः च मूलं कुत्र निहितम् ?

(ङ) 'अष्टाध्यायी' इति संस्कृतव्याकरणस्य रचयिता कः अस्ति ?

(च) अभिमानी काकः चटकां किम् अवदत् ?

**17. अधोलिखितश्लोकांशानाम् मेलनं कुरुत ।** (1 x 5 = 5)

| | | | |
|---|---|---|---|
| (i) | अद्यैव मरणमस्तु | (क) | गच्छतु वा यथेष्टम् |
| (ii) | सर्वे भवन्तु सुखिनः | (ख) | पदं न धीराः |
| (iii) | निन्दन्तु नीतिनिपुणाः | (ग) | सर्वे सन्तु निरामयाः |
| (iv) | न्यायात् पथः प्रविचलन्ति | (घ) | युगान्तरे वा |
| (v) | लक्ष्मीः समाविशतु | (ङ) | यदि वा स्तुवन्तु |

**18. शब्दार्थमेलनं कुरुत :-** (1 x 6 = 6)

| | | | |
|---|---|---|---|
| (i) | शरदि | (क) | दूरीकरोति |
| (ii) | अपाकरोति | (ख) | रविः |
| (iii) | धीराः | (ग) | विदुषः |
| (iv) | दिवाकरः | (घ) | शरद्-ऋतौ |
| (v) | पण्डितान् | (ङ) | बुद्धेः |
| (vi) | धियः | (च) | धैर्यवन्तः |

***************